# E-Text

पत्रस्य नाम : लघुशब्देन्दुशेखरः (सन्धिपञ्चकम्)
पत्रसंख्या : V
पाठ्यांशनाम : इको यणचि
पाठ्यांशसंख्या : 1
पाठ्यांशस्य मुख्याः अंशाः :

1) इको यणचि – सूत्रार्थः, कार्यशब्दवादः, नित्यशब्दवादः।
2) अत्र स्थानेऽन्तरतमसूत्रेण व्यवस्था।
3) प्रत्याहारेषु जातिपक्षः।
4) द्वित्वम्।
5) अनचि च, नादिन्याक्रोशे पुत्रस्य, तत्परे च, वा हृतजग्धयोः।

विषयसूची


1.0 : उपोद्घातः - सूत्रार्थः
2.0 : सूत्रार्थः कार्यशब्दवादानुसारेण / नित्यशब्दवादानुसारेण वा
3.0 : इको यणचीत्यत्र व्यवस्था स्थानेऽन्तरतमसूत्रेण / यथासंख्यसूत्रेण वा
3.1 : प्रत्याहारेषु जातिपक्षो वा व्यक्तिपक्षो वा
4.0 : शब्दनित्यत्वपक्षे शब्दकार्यतापक्षे च व्याकरणं कथं साध्वनुशासनं भवति
5.0 : जातिपक्षे यथासंख्यसूत्रमनादृत्य स्थानेऽन्तरतमसूत्रेण व्यवस्थायां फलम्
6.0 : द्वित्वम् - उपोद्घातः - अचो रहाभ्यां द्वे
6.1 : अनचि च
6.1.1 : अनचि चेति सूत्रस्य विधिसूत्रत्वम्
6.1.2 : अनचीति प्रसज्यप्रतिषेधः, तत्फलञ्च
6.1.3 : उदाहरणे आक्षेपः समाधानञ्च
7.0 : नादिन्याक्रोशे पुत्रस्य - तत्परे च - वा हृतजग्धयोः


e-Pathshala
A Gateway to all Post Graduate Courses

1.0 उपोद्घातः - सूत्रार्थः

षष्ठाध्याये संहितायाम् इत्यस्मिन्नधिकारे इको यणचि इति सूत्रम्। अतः, संहितायामिति पदमनुवर्तते। संहितायाम् अचि इकः यण् - इति चतुर्भिः पदैः योग्यपदाध्याहारेण च सूत्रार्थो वर्ण्यते। सिद्धान्तकौमुद्यां सूत्रवृत्तिः - इकः स्थाने यण् स्याद् अचि संहितायां विषये इति। अत्र षष्ठी स्थानेयोगा इति सूत्रानुसारेण स्थानेपदम् अध्याहृतम्। संहितायामिति वैषयिकाधिकरणेर्थे सप्तम्यन्तम्। तत्सूचयितुं विषयपदम् अध्याहृतम्। इदं विधिसूत्रं भवति। तत्सूचयितुं स्याद् इति विधिलिङन्तपदमध्याहृतम्।

2.0 सूत्रार्थः कार्यशब्दवादानुसारेण / नित्यशब्दवादानुसारेण वा

शेखरवाक्यम् - स्यादिति। कार्यशब्दवादे इदम्।।

स्याद् इत्यस्य कोर्थः - स्याद् इति विधिलिङन्तं पदम्। भवेद् भविष्यति उत्पत्स्यते इत्यर्थः। यस्य उत्पत्तिः उच्यते तत् पूर्वं न आसीदित्यर्थः। यदि तत् पूर्वमेवासीत् तर्हि तत् उत्पत्स्यते इति वक्तुं न शक्यते। शब्दा नित्याः इति व्याकरणसिद्धान्तः। नित्येषु शब्देषु वर्णाः कूटस्थाः। वर्णानाम् उत्पत्तिः विनाशः विकारो वा न सम्भवतीत्यर्थः। तस्मात् पृच्छति- नित्यः शब्द इति व्याकरणसिद्धान्तश्चेत् स्याद् इति कथमुच्यते?

**उत्तरम्** - कार्यशब्दवादे इदमिति। कार्यशब्दवादो नाम शब्दाः कार्या इति वादः। कर्तुं शक्याः कार्याः। उत्पादयितुं शक्याः। यः उत्पादयितुं शक्यः स विनाशयितुमपि शक्यः। तथा च शब्दाः अनित्याः। अनित्याः ये शब्दाः तान् उद्दिश्य एवमुक्तम् - स्याद् इति। के च अनित्याः शब्दाः। ये बुद्धौ विद्यन्ते। बुद्धिस्थाः शब्दाः अनित्याः। बुद्धौ सुधी उपास्य इति ईकारयुक्तं रूपं सङ्कल्प्य तत्रत्यमीकारम् अपनीय तत्स्थाने

यकारः क्रियते। इदानीं सुद्ध्युपास्य इति बुद्धिस्थः शब्दः उत्पादितः। तद्द्वारा प्रयोगस्थस्य सुद्ध्युपास्य इति नित्यस्य शब्दस्य साधुत्वं निश्चीयते। व्याकरणप्रक्रियया ज्ञातो यः शब्दः तत्समानः शब्दः साधुरिति। अन्यः असाधुरिति। नित्याः शब्दाः इति वादः नित्यशब्दवादः। व्याकरणप्रक्रियया यः शब्दः प्रकृतिप्रत्यययोजनादिद्वारा निष्पाद्यते स शब्दः वस्तुतः पूर्वमेवास्ति। रेखागवयन्यायेन तु केवलं तस्मिन् विद्यमानानां वर्णानां प्रतिपादनं क्रियते। यथा गवयं चित्रयितुमिच्छन् चित्रकारः प्रथमम् एकां रेखां लिखति, ततः लाङ्गूलं पादान् कर्णौ नेत्रे शृङ्गे इति क्रमेण एकैकमवयवं लेखनेन उत्पादयति, तथा। चित्रकारेण यदा एकैकः अवयवः लिख्यते न तदा वास्तविके गवि अवयवः उत्पद्यते। सर्वावयवविशिष्टो गवयस्तु पूर्वमेवासीत् इदानीमप्यस्ति भविष्यति च। बुद्धौ तु चित्रलेखनक्रमेण उत्पत्तिविनाशादिकं भवति। कार्यशब्दवादानुसारेण - सुधीभिः उपास्यः इत्यर्थे सुधीशब्दस्य उपास्यशब्देन समासे सन्धौ च कृते सुध्युपास्यः इति रूपम् उत्पाद्यते।

1. सुधी भिस् उपास्य सु
2. सुधी उपास्य
3. सुध् य् उपास्य
4. सुध् ध् य् उपास्य
5. सुद् ध् य् उपास्य
6. सुद्ध्युपास्य सु
7. सुद्ध्युपास्य रु = सुद्ध्युपास्यः।।

सुद्ध्युपास्य इति शब्दः उत्पाद्यते बुद्धौ। तत्समाने सुद्ध्युपास्य इति प्रयोगस्थे शब्दे तु ये वर्णाः ते तथैवासन् प्रागपि, सन्ति च, भविष्यन्ति च।

Pathshala पाठशाला A Gateway to all Post Graduate Courses

**3.0 इको यणचीत्यत्र व्यवस्था स्थानेऽन्तरतमसूत्रेण / यथासंख्यसूत्रेण वा।**

**शेखरे** - स्थानत इति। इदं यथासंख्यसूत्रे भाष्ये स्पष्टम्। अनुनासिकस्थानेपि निरनुनासिक एव। विधीयमानत्वेन सवर्णाग्राहकत्वात्। गुणाभेदकत्वपक्षोऽपि न विधेयाण्विषये।

**कौमुद्यां** - सुधी उपास्य इति स्थिते स्थानत आन्तर्यादीकारस्य यकारः।

**व्यक्तिपक्षः** - व्यक्तिपक्षे गुणानां भेदकत्वम् अभेदकत्वमिति अवान्तरपक्षद्वयमस्ति। गुणानामभेदकत्वञ्चेत् ह्रस्वदीर्घप्लुतभेदेन त्रिविधा एव इवर्णाः।

इक् - इउऋलृ।

इ - इ ई इ३।

उवर्णा ऋवर्णाश्च तथैव। लृवर्णास्तु द्विविधा एव, दीर्घाभावात्। आहृत्य- एकादश इकः।।

गुणानां भेदकत्वञ्चेत् अनुनासिकाननुनासिकभेदेन उदात्तानुदात्तस्वरितभेदेन च अष्टादशविधा इवर्णाः सम्पद्यन्ते। इक् - इ उ ऋ लृ।

इ -इइइ इँइँइँ ईईई ईँईँईँ इ३इ३इ३ इँ३इँ३इँ३।

उवर्ण ऋवर्णश्च तथैव। लृवर्णा द्वादशविधा एव दीर्घाभावात्।

आहृत्य- 18+18+18+12 = 66 इकः।।

यण् - य व र ल। अनुनासिकाननुनासिकभेदन यवला द्विधा। य व र ल = चत्वारः यणः।

एवं व्यक्तिपक्षे कार्यिविधेययोः समसंख्यत्वाभावात् यथासंख्यमनुदेशः समानाम् इत्यस्य प्रवृत्तिरत्र न सम्भवति।

तस्मात् व्यक्तिपक्षे स्थानेऽन्तरतम इति सूत्रेणैव व्यवस्था वाच्या।।

ePathshala पाठशाला A Gateway to all Post Graduate Courses

**अत्र प्रश्नः** - गुणानां भेदकत्वपक्षे य यँ व वँ र ल लँ इति यणः सप्तविधाः खलु सन्ति। कथं चत्वार इति कथितम्।

**उत्तरम्** - अणुदित्सवर्णस्य चाप्रत्यय इति सूत्रे अप्रत्यय इति निषेधात् विधेयेन यणा सवर्णग्रहणं नास्ति। तस्मात् यवरल इत्येते चत्वार एव यणः।

**अत्र पुनः प्रश्नः** - अनुनासिकाननुनासिकयोः भेदे खलु अणुदित्सूत्रप्रवृत्त्या अननुनासिकेन अनुनासिकस्य ग्रहणं ग्रहणनिषेधश्च सम्भवति। गुणानामभेदकत्वपक्षे तु अनुनासिकाननुनासिकयोरभेदात् स्थानेऽन्तरतमसूत्रानुसारेण अनुनासिकस्य स्थाने अनुनासिक एवादेशः कथं न स्यात्। यथा दधिँ इत्यत्र अणोऽप्रगृह्यस्यानुनासिक इति सूत्रेण अनुनासिको विकल्पेन विधीयते, तस्यासिद्धत्वेपि अनुनासिकविशिष्टस्य यदा अनुकरणं क्रियते तदा तत्र अचि परे अनुनासिकस्य इकारस्य स्थाने अनुनासिक एव यकारः आन्तरतम्यात् प्राप्नोति, निरनुनासिक एव तु इष्यते।

**उत्तरं** - विधेयाण्विषये गुणानामभेदकत्वमिति पक्षो नास्ति। विधेयाण्विषये सर्वदा गुणानां भेदकत्वमेव स्वीकार्यमिति सिद्धान्तः। यद्गुणविशिष्टतया यो वर्णो विधीयते स तद्गुणविशिष्ट एव भवति, न तु गुणान्तरयुक्तः।

**जातिपक्षः** -

**शेखरे - दीर्घादीनामिगादिपदैरुपस्थितये प्रत्याहारेषु जातिपक्ष एवेत्यणुदित्सूत्रे भाष्ये स्पष्टम्। अत एव सर्वतकारादीनां झल्त्वादिसिद्धिः। ल्वादय इत्यादिनिर्देशादयश्च जात्याश्रयणे मानम्।**

यद्यपि अष्टादशविधा इवर्णव्यक्तयः अष्टादशविधा उवर्णव्यक्तयः अष्टादशविधा ऋवर्णव्यक्तयः द्वादशविधा लृवर्णव्यक्तयश्च तथापि इवर्णादिव्यक्तिषु विद्यमाना जातिरेकैव। इवर्णव्यक्तिषु इवर्णजातिः, उवर्णव्यक्तिषु उवर्णजातिः, ऋवर्णव्यक्तिषु ऋवर्णजातिः, लृवर्णव्यक्तिषु लृवर्णजातिरिति चतस्रो जातयः।

तथा यजातिः वजातिः रजातिः लजातिरिति चतस्रो जातयः। तथाच जातिपक्षे समसंख्यत्वात् यथासंख्यमनुदेशः समानामिति सूत्रेण व्यवस्था सुवचा। स्थानेऽन्तरतमसूत्रेण तु व्यवस्था उभयोरपि पक्षयोः सम्भवति।

**3.1 प्रत्याहारेषु जातिपक्षो वा व्यक्तिपक्षो वा**

**प्रश्नः** - यदि जातिपक्षे व्यक्तिपक्षे च स्थानेऽन्तरतमसूत्रेण व्यवस्था सम्भवति तर्हि स्थानत आन्तर्यादीकारस्य यकार इति कौमुदीस्थं वाक्यं किं जातिपक्षे वा व्यक्तिपक्षे वा- इति।

**उत्तरम्** - यद्यपि व्यक्तिपक्षमाश्रित्यापि स्थानेऽन्तरतमसूत्रेण व्यवस्था सुवचा तथापि जातिपक्षमाश्रित्यैव व्यवस्था वक्तव्या। कुतः। प्रत्याहारेषु जातिपक्ष एवाश्रयणीय इति सिद्धान्तात्। अन्यथा इगादिपदैः ऊकारादीनामुपस्थापनं न सम्भवति। इक्पदेन इउऋऌ इति चतुर्णामेवोपस्थापनं भवेत्। उच्चारिता एव सवर्णान् गृह्णीयुः। न तु उपस्थापिताः। इक् इति पदे इकारस्तु उच्चारितः ईकारं गृह्णीयात्। इक्पदेन उपस्थापिताः उकार ऋकार ऌकारश्च अनुच्चारिता इति कृत्वा स्वसवर्णान् न ग्रहीष्यन्ति।

जातिपक्षाश्रयणे तु, अणुदित्सवर्णस्य चेति वचनं विनापि, सर्वोऽपि वर्णः स्वसजातीयान् अन्यान् वर्णान् ग्रहीष्यत्येव।

**जातिपक्षस्य अनाश्रयणे दोषः**

जातिपक्षाश्रयणं विना झलो झलीति सूत्रेण अवात् स् ताम् इत्यादौ सकारलोपो वक्तुं न शक्यते। व्यक्तिपक्षे झल्पदेन या तकारव्यक्तिः स्वीक्रियते, एका सा तकारव्यक्तिः कथं सकारात् पूर्वत्र स्थिता परत्रापि भवितुं शक्नुयात्। तस्मात् जातिपक्ष एवाश्रयणीयः प्रत्यहारनिर्देशेषु।

**प्रत्याहारेषु जातिपक्षाश्रयणे सूत्रकारसम्मतिः** - ल्वादिभ्यः(8.2.44) इत्यादियणादेश-सहितनिर्देशं करोति पाणिनिः। लू आदिभ्य इति स्थिते इको यणचीति सूत्रेण यणादेशे ल्वादिभ्य इति रूपम्। प्रत्याहारेषु व्यक्तिपक्षाश्रयणं चेत् इक्पदेन ऌकारस्य ग्रहणाभावात् वकारादेशो न स्यात्। सूत्रकारेण तु वकारादेशः कृतः। तेन ज्ञायते प्रत्याहारेषु जातिपक्ष इति।

**4.0 शब्दनित्यत्वपक्षे शब्दकार्यतापक्षे च व्याकरणं कथं साध्वनुशासनं भवति**

**शेखरे - व्याकरणस्य साध्वनुशासनत्वन्तु शब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रवैयर्थ्यापत्त्या मृजिप्रसङ्गे मार्जिः साधुर्भवतीत्यादिवृद्धिसंज्ञासूत्रस्थभाष्यप्रामाण्येन यदिह परिनिष्ठितत्वेन ज्ञाप्यं तत् साधु इति अर्थापत्तिकल्प्यवाक्येन बोध्यम्।**

**नित्यशब्दवादे** - यदि शब्दाः नित्याः तर्हि सर्वदा सिद्धा एव, न ते व्याकरणशास्त्रेण साधनीयाः सन्ति, एवञ्च व्याकरणशास्त्रं व्यर्थम्। किन्तु व्याकरणं साधुशब्दानुशासनम् इति सर्वैरुच्यते, तत् कथं घटते - इति प्रश्नः।

**उत्तरं** - "यदिह शास्त्रे परिनिष्ठितेन प्रक्रियालभ्येन कार्येण शब्देन ज्ञाप्यं नित्यं शब्दस्वरूपं तत् साधु, ततोऽन्यत् असाधु" इति ज्ञापनार्थं शास्त्रम्।

साध्वनुशासनमित्यस्य साधुशब्दज्ञापकमित्यर्थः। बुद्धौ प्रक्रियासोपानानि कल्प्यन्ते। तत्र अन्तिमसोपाने यद् रूपं निष्पद्यते तत्सदृशं रूपं साधु इति ज्ञापनार्थं शास्त्रम्। एवञ्च प्रक्रियालभ्यकार्यशब्दस्य नित्यशब्दस्य च ज्ञाप्यज्ञापकभावः। रेखागवयस्य वास्तविकगवयस्य च यथा। अस्मिन् चित्रे यद् दृश्यते तद् गवय इत्युपदेशं श्रुत्वा बालः पश्चात् तत्सदृशरूपविशिष्टं जन्तुं पश्यन् अध्यवस्यति- अयं गवय इति।

**कार्यशब्दवादे** - परिनिष्ठितरूपसम्पादकं व्याकरणम्। तत्र परिनिष्ठातः पूर्वं विद्यमानेषु सोपानेषु प्रवर्तमानस्य सूत्रस्य पृथक् साध्वनुशासनत्वं नास्ति। सर्वेषां परिनिष्ठार्थमपेक्षितानां सूत्राणां समुदायस्यैव तत्तत्परिनिष्ठितरूपं प्रति शास्त्रत्वम्।

**5.0 जातिपक्षे यथासंख्यसूत्रमनादृत्य स्थानेऽन्तरतमसूत्रेण व्यवस्थायां फलम्।**

**शेखरे** - एतेन = जातिपक्षेपि यथासंख्यसूत्रं विहाय स्थानत आन्तर्यादीकारस्य यकार इति वाक्येन। स्थानप्रमाणोभयान्तरतमे ह्रस्वे इकारे यणादेशः चरितार्थः इत्याक्षेपः। स्थानत आन्तर्यात् इति कथनेन प्रमाणादिकृतसादृश्यस्यानादरः। स्थानेऽन्तरतमे इति सप्तम्यन्तपाठः भाष्यकृतैव तिरस्कृतः।

**6.0 द्वित्वम् -उपोद्घातः - अचो रहाभ्यां द्वे**

**शेखरे** - इदं द्वित्वं षाष्ठद्वित्ववत् द्विःप्रयोग एव। यर इत्यादेः अध्याहृतोच्चारण-क्रियानिरूपितकर्मषष्ठात्वस्यौचित्यात्।

षाष्ठम् आष्टमिकञ्च द्वित्वमस्ति व्याकरणे। षष्ठाध्याये धातोः द्वित्वमुच्यते। अष्टमाध्याये पदस्य द्वित्वं, वर्णस्य द्वित्वञ्च। वर्णस्य द्वित्वं अष्टमे चतुर्थपादे विद्यते।

1) अचो रहाभ्यां द्वे

2) अनचि च

3) नादिन्याक्रोशे पुत्रस्य

4) शरोचि

5) त्रिप्रभृतिषु शाकटायनस्य

6) सर्वत्र शाकल्यस्य

7) दीर्घादाचार्याणाम् - इति सप्तभिः सूत्रैः द्वित्वव्यवस्था क्रियते।

Pathshala पाठशाला A Gateway to all Post Graduate Courses

द्विःप्रयोगो द्वित्वं, स्थाने द्वित्वम् -इति पक्षद्वयमस्ति द्वित्वविषये। द्विःप्रयोगो द्वित्वमिति सिद्धान्तः। द्वित्वविधायकसूत्रेषु द्वे इति शब्दः प्रयुज्यते। यरः द्वे इत्येवम्। द्वे इत्यस्य उच्चारणे इति विशेष्यशब्दः अध्याह्रियते। उच्चारणक्रियानिरूपितकर्मणि षष्ठी यर इति, न तु स्थानषष्ठी। यरं द्विः उच्चारयेदित्येवमर्थः।

यरोऽनुनासिकेऽनुनासिको वा इत्यतः यरः इति षष्ठ्यन्तमनुवर्तते। अच इति पञ्चम्यन्तम्। अचः यरः द्वे -इति पदत्रयं द्वित्वसूत्रेष्वेषु व्यप्नोति।।

**अचो रहाभ्यां द्वे**

यरोऽनुनासिकेऽनुनासिको वा इति सूत्रात् वापदमनुवर्तते।

1. अच् - रेफः - यर् = अच् - रेफः - (यर् यर्)

उदाः - हरि + अनुभवः = हर् य् अनुभवः = ह् (अ र् य्) अनुभवः = ह् (अ र् य्य्) अनुभवः।

2. अच् - हकारः - यर् = अच् -हकारः- (यर् यर्)

उदाः - नहि + अस्ति = न ह् य् अस्ति = न् (अ ह् य्) अस्ति = न् (अ ह् य्य्) अस्ति।

pathshala पाठशाला A Gateway to all Post Graduate Courses

**6.1 अनचि च**

1. यरोऽनुनानिकेऽनुनासिको वा, अचो रहाभ्यां द्वे -इत्यतः अचः यरः द्वे -इत्यनुवर्तते।

यर् - हकारादन्यः सर्वोपि हल्। अनचि = अचि न भवति। अचो हलश्च मध्ये विद्यमानं यरं द्विः उच्चारयेत्, अचोऽवसानस्य च मध्ये विद्यमानं यरं द्विरुच्चारयेत् -इति सामान्यतः सूत्राशयः।

तथाहि - 1. अच् - यर् - हल् = अच् - (यर् यर्) - हल्

उदाः - सुधी+ उपास्यः = सु ध् य् उपास्यः = स् (उ ध् य्) उपास्यः = स् (उ ध्ध् य् उपास्यः।।

2. अच् - यर् - अवसानम् = अच् - (यर् यर्) -अवसानम्

उदाः - वाक् = व् (आ क् - ) = व् (आ क्क्) = वाक्क्।।

**6.1.1 अनचि चेति सूत्रस्य विधिसूत्रत्वम्**

शेखरे - चो विध्यर्थः।

**अनचि चेति सूत्रस्य विधिसूत्रत्वम्**

अचः यरः द्वे, अनचि - इति वाक्यद्वयम्, वाक्यभेदसूचकः चकारः। द्वे स्तः, कस्य, अचः परस्य यरः - इति विधीयते। अचि तदभावे च द्वित्वे प्राप्ते अचि तस्य निषेध उच्यते। ते द्वे अचि न भवतः च -इति निषेधवाक्यं विधिवाक्येन समुच्चिनोति चकारः। एवञ्च - अचः परस्य यरः द्वे स्तः, अचि परे द्वे न स्तः च इति वाक्यद्वयम्।

**विधिसूत्रत्वे भाष्यसम्मतिः**

शेखरे - ध्वनितञ्चेदम् एओङ् सूत्रे भाष्ये।

तत्रोक्तम् – गो३त्रात नौ३त्रात इत्यत्र अनचि चेति अच उत्तरस्य यरो द्वे भवत इति द्विर्वचनं न प्राप्नोतीति। अस्माद् भाष्यवाक्यात् अस्य सूत्रस्य द्वित्वविधायकत्वमिति भाति।

शेखरे - द्वे वास्तः इति। सूत्रकृता शाकल्यमते सर्वत्र द्वित्वाभावोक्तेरिति भावः।

**द्वित्वविधेः वैकल्पिकत्वं कथम्**

यरोऽनुनासिकेऽनुनासिको वा इत्यतः वाग्रहणानुवृत्त्या इति कैयटः। सर्वत्र शाकल्यस्य - इति सूत्रेण शाकल्यमते सर्वत्र द्वित्वाभावोक्त्या, तदन्यमते तत्सत्वाच्च विकल्पः सिद्ध इति नागेशः।

**6.1.2 अनचीति प्रसज्यप्रतिषेधः, तत्फलञ्च**

शेखरे - अवसाने द्वित्वसिद्धये अनचीति प्रसज्यप्रतिषेधः, तदाह - न त्वचीति। अनचीति पर्युदासो वा प्रसज्यप्रतिषेधो वा?

पर्युदासे - अज्भिन्ने अच्सदृशे परे द्वित्वं स्यादित्यर्थः। तदा हलि परे इत्यर्थः सम्भवति। तथा च अवसाने वाक्क् वाक् इत्यादौ हल्परकत्वाभावात् द्वित्वविकल्पो न सिध्येत्।

प्रसज्यप्रतिषेधे - अचि न भवतीत्यर्थः। तथाच हलि परे, अवसाने च द्वित्वं सिध्यति।

**6.1.3 उदाहरणे आक्षेपः समाधानञ्च**

**पुनर्द्वित्वाभावः**

द्वित्वे कृते सु ध् ध् य् उपास्य इति। उकारात् परस्य धकारस्य अनचि च इति पुनः द्वित्वं कुतो न भवति। लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः।

**विकारान्यत्वेन लक्ष्यभेदः**

लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिः - इति न्यायस्य एकस्मिन्नेव लक्ष्ये एकं लक्षणं एकवारमेव प्रवर्तत इति अर्थः। प्रकृते तु सु ध् य् उपास्य इति एकधकारविशिष्टे लक्ष्ये अनचि च इति प्रवर्तते। सुध् ध् य् उपास्य इति च धकारद्वयविशिष्टम् अन्यदेव लक्ष्यम्। तस्मात् कथं स न्यायः प्रवर्तते - इति प्रश्नः।

उत्तरम् - विकारेण यदन्यत्वं तादृशेनान्यत्वेन लक्ष्यभेदो नाङ्गीक्रियते।

**7.0 नादिन्याक्रोशे पुत्रस्य - तत्परे च - वा हतजग्धयोः**

**।।नादिन्याक्रोशे पुत्रस्य।।**

**शेखरे** - सूत्रे आदिनीति ङ्यन्तानुकरणं लुप्तसप्तमीकम्।

epathshala पाठशाला A Gateway to all Post Graduate Courses

अत्र कथं पदच्छेदः –

1. आदिनि आक्रोशे इति सप्तम्यन्त आदिन् शब्दो वा।

2. आदिनी आक्रोशे इति ङ्यन्त आदिनीशब्दो वा।

तत्वबोधिनीकारादीनां मते सप्तम्यन्त आदिन् शब्दः। हरदत्तमते माधवमते च ङ्यन्तः। शेखरकारस्तु ङ्यन्त आदिनीशब्द इति मतं सिद्धान्ततया स्वीकरोति।

एतच्च उदाहरणपर्यालोचनेन व्याख्यानादवगन्तव्यम्। न आदिनी आक्रोशे पुत्रस्य इति। आदिनीशब्दे परे इत्यर्थः। यरोऽनुनासिकेऽनुनासिको वा इत्यतो यर इति अनुवर्तते।

पुत्रशब्दावयवस्य यरः आदिनीशब्दे परे द्वित्वं न स्याद् आक्रोशे। आक्रोशो निन्दा। पुत्र आदिनी इत्यनयोः समासे पुत्रादिनी इति। तत्र पुत् र् आदिनी इत्यवस्थायां तकारस्य अनचि च इत्यनेन द्वित्वं प्राप्तम्। तत् निषिध्यते। (एकेन वर्णेन व्यवधानं तु यरः सोढव्यम्।)

तत्परे च - पुत्रादिनीशब्दे परे पुत्रशब्दस्य द्वित्वं न, आक्रोशे इत्यर्थः। पुत्रापुत्रादिनी।

**वा हतजग्घयोः** - हतशब्दे परे जग्घशब्दे परे च पुत्रशब्दस्य द्वित्वं वा, आक्रोशे। पुत्रहती पुत्त्रहती। पुत्रजग्धी पुत्त्रजग्धी। पुत्रः हतः अनया पुत्रः जग्धः अनया इति विग्रहः।

**अत्र प्रश्नः** - अनचि च इत्यनेनैव विकल्पोऽत्र सिध्यति, किमर्थं वार्तिकमिति।

**उत्तरम्** - पुत्रशब्दस्य त्कान्ते परे अनचि चेत्यनेन द्वित्वं भवति चेत् हतजग्घयोरेव परतः, आक्रेशे एव इति नियमार्थम्।

epathshala पाठशाला A Gateway to all Post Graduate Courses